# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| | | |
|---|---|---|
| कक्षा -शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम्-६ | गुणाः - ७० |
| विषयः - फलितज्यौतिषम् | (C.C.- 1.1.2. New ) | समयः ११:३० तः २:३० |
| दिनाङ्कः - १५/१०/२०१९ | सन्दर्भग्रन्थः - लघुजातकम् , षट्पञ्चाशिका | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) आत्मा रविः शीतकरस्तु चेतः सत्त्वं धराजः शशिजोऽथ वाणी ।
ज्ञानं सुखं चेन्द्रगुरुर्मदश्च शुक्रः शनिः कालनरस्य दुःखम् ॥

(ख) शीर्षमुखवाहुहृदयोदराणि कटिवस्ति गुह्यसंज्ञानि
उरू जानू जङ्घे चरणाविति राशयोऽजाद्याः ॥

(ग) षष्ठेऽष्टमे चन्द्रः सद्यो मरणाय पापसंदृष्टः ।
अष्टाभिः शुभदृष्टो वर्षैर्मिश्रैस्तर्धेन ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(क) अरिष्टविचारः ।

(ख) ग्रहाणां मित्रामित्रविचारः ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) चरभवनादिषु सर्वैराश्रयजा रज्जुमुसलनलयोगाः ।
ईर्ष्युमानी धनवान् क्रमेण कुलविश्रुताः सर्वे ॥

(ख) अवले सप्तमभवने सौम्येक्षणवर्जिते च कापुरुषः ।
भवति पतिश्चरभेऽस्ते प्रवासशीलो भवेद्भ्रान्तिः ॥

(ग) सूर्याद्द्वितीयमृक्षं वेशिस्थानं प्रकीर्तितं यवनैः ।
तच्चेष्टग्रहयुक्तं जन्मनि चेष्टासु च विलग्नम् ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । १०**

(क) संख्यायोगविचारः ।

(ख) अनफासुनफादुरुधराकैमद्रुमयोगानां लक्षणम् ।

## तृतीयान्वितिः

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सान्वयं व्याख्यां करोतु । १०**

(क) यो यो भावः स्वामीदृष्टो युतो वा सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः ।
पापैरेवं तस्य भावस्य हानिर्निर्देष्टव्या पृच्छतां जन्मतो वा ॥

(ख) झषालिकुम्भकर्कटा रसातले यदा स्थिताः ।
रिपोः पराजयस्तदा चतुष्पदैः पलायनम् ॥

(ग) अष्टमस्थे निशानाथे कण्टकैः पापवर्जितैः ।
प्रवासी सुखमायाति सौम्यैर्लाभसमन्वितः ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । १०**

(क) शत्रोर्मार्गनिवृत्तिज्ञानम् । (ख) प्रश्नसमये लाभादौ शुभाशुभज्ञानम् ।

## संयुक्तान्वितिः

**प्रश्नः ७ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु । १०**

(१) लघुजातकम् – इति ग्रन्थस्य रचनाकारः कः ?

(२) कन्याराशेः स्वामी कः ?

(३) सूर्यस्य मूलत्रिकोणराशि कः ?

(४) चन्द्रस्य उच्चराशिनाम लिखत ।

(५) कालपुरुषस्य अङ्गे मुखस्य विचारः केन राशिणा भवति ?

(६) षड्वर्गानां नामानि लिखत ।

(७) कालपुरुषस्य आत्मा कोऽस्ति ?

(८) विप्राणां स्वामी कौ ग्रहौ स्तः ?

(९) सूर्यस्य मित्रग्रहाणां नामानि लिखत ।

(१०) गर्भस्य प्रथमे मासे कः अधिपतिः भवति ?

(११) रज्जुयोगस्य लक्षणं लिखत ।

(१२) षट्पञ्चाशिका– इत्यस्य रचनाकारः कः ?

(१३) शत्रुः भावः कः ?

(१४) चरराशिनां नामानि लिखत ।

(१५) शुभाशुभग्रहाणां नामानि लिखत ।

----oooo----